शिवशंकर तिवारी

# महर्षि पतंजलि संस्कृत संस्थान भोपाल

## प्रश्न बैंक

कक्षा – पूर्वमध्यमा द्वितीय वर्षम् (10वी)

विषयः – ज्योतिषम् – ('अ' भाग – लीलावती (क्षेत्रव्यवहारतः ग्रन्थसमाप्तिपर्यन्तम्) अंक – 50)
('ब' भाग – मुहुर्तचिन्तामणिः (यात्राप्रकरणतः ग्रन्थसमाप्तिपर्यन्तम्) अंक – 50)

विषयकोड –1008 पूर्णांक – 100

------00------

'अ' भाग – लीलावती (क्षेत्रव्यवहारतः ग्रन्थसमाप्तिपर्यन्तम्) (अंक–50)

अतिलघुत्तरीयप्रश्नाः –

प्रथम ईकाई

1. त्र्यस्रे चतुर्भुजे वा यः इष्टोः बाहुः स्यात् तत् स्पर्धिन्यां दिशि इतरो बाहुः तज्ज्ञैः किं कीर्तिताः ?
2. भुजः कोटिः च अनयोः वर्गयोगस्य वर्गमूलं किं कथ्यते ?
3. इष्टो भुजः, अस्मात् द्विगुणेष्टनिघ्नात्, इष्टस्य कृत्या एकं वियुक्तया, आप्तं किं स्यात् ?
4. सैकेन इष्टवर्गेण द्विघ्नः कर्णः हृतः प्राप्तलब्धौ इष्टगुणितेन किं भवति ?
5. सर्वदोर्युति दलं चतुः स्थितं बाहुभिः विरहितं च तद् बधात् मूलं कस्य स्पष्टक्षेत्रफलं भवति ?
6. द्विगुणाच्च कर्णात् इष्टेन निघ्नात् इष्टस्य कृत्यैक भुजा यदाप्तम् सा का भवेत् ?
7. कर्ण–कोट्योः वर्गान्तरस्य वर्गमूलं किं भवति ?

द्वितीय ईकाई

08. अतुल्यकर्णाभिहतिर्द्विभक्ता फलं स्फुटं कुत्र स्यात् ?

09. यल्लम्बलम्बाश्रितबाहुवर्गविश्लेषमूलं सा का कथिता ?

10. तदून (आबाधोन) भूवर्गसमन्वितस्य यल्लम्बवर्गस्य पदं सः कः स्यात् ?

11. कर्णोभयतः स्थिते ये त्र्यस्रे तयोः फलैक्यम् कस्य क्षेत्रफलं भवति ?

12. आबाधयोना चतुरस्रभूमिः या लम्ब वर्गैक्यपदं किं स्यात् ?

13. चतुर्भुजान्तस्त्रिभुजेऽवलम्बः प्राग्वद्भुजौ ............मही भूः। सूत्रस्यास्य रिक्तपदं पूरयत ?

14. अभीष्टजात्यद्वयबाहुकोट्यः परस्परं कर्णहता कस्य भुजा भवति ?

## तृतीय ईकाई

15. सूक्ष्मपरिधेः ज्ञानं कथं भवति ? अथवा स्थूलपरिधेः ज्ञानं कथं क्रियते ?

16. व्यासस्य वर्गे भनवाग्निनिघ्ने पञ्चसहस्त्रभक्ते किं स्यात् ?

17. ज्याव्यासयोगान्तरघातमूलं तदूनो व्यासः दलितः कः स्यात् ?

18. प्रथमाद्यसाधनं कथं क्रियते ?

19. ''त्रिद्वयङ्काग्निनभश्चन्द्रैः'' अत्र का संख्या उक्तास्ति ?

20. ''खखाभ्राभ्ररसैः'' पदेऽस्मिन् का संख्या निगदितास्ति ?

## चतुर्थ इकाई

21. असमखातस्य सममानं कथं ज्ञायते ?

22. उच्छ्रयेण गुणितं क्षेत्रसम्भवफलं किल चितेः किं भवति ?

23. कति संख्यया विहृते अङ्गुलात्मकं दारूणदारपथं हस्तात्मकं भवति ?

24. अनणु–अणु–शुक–धान्यानां परिधेः कतमांशाः वेधमानाः भवन्ति ?

25. भित्त्यन्तर्बाह्यकोणस्थधान्यराशेः घनमानं (फलं) कथं ज्ञायते ?

26. दीपशिखौच्चमानं कथं ज्ञायते इति स्पष्टयत ?

## पंचम ईकाई

27. कुट्टकान्तर्गतं परस्परं भाजितयोः ययोः संख्ययोः यः शेषः सः तयोः संख्ययोः किं स्यात् ?

28. धनात्मकक्षेपस्य लब्धिः गुणकश्च स्व स्व तक्षणे (भाज्यहारौ) वियोगजे किं भवति ?

29. यत्र क्षेपाभावः अथवा हरोद्धृतः क्षेपः तत्र गुणकं किं भवति ?

30. गुणकः लब्धिश्च इष्टाहत स्व स्व हरेण युक्ते तदा बहुधा का भवति ?

31. अङ्कपाशानुसारं त्रिनवाष्टकसंख्यायाः (३६८) कति भेदाः सम्भवन्ति ?

32. अङ्कपाशप्रश्नाः ग्रन्थकारेण किमर्थं प्रष्टाः सन्ति ?

2. लघुत्तरीय प्रश्नाः –

## प्रथम इकाई

01. भुजकोट्योः परिभाषा लिखत ?

02. इष्टाभ्यां भुजकोटिकर्णानयनम् सूत्र सहितं स्पष्टयत् ?

03. कर्णकोटियुतौ भुजे च ज्ञाते पृथक्करणार्थं सूत्रं स्पष्टयत ?

04. त्रिभुजचतुर्भुजयोः क्षेत्रफलानयने करणसूत्रं उहादरणपूर्वकं स्पष्टयत ?

05. लम्बाऽऽबाधाऽऽनयनम् उदाहरणसहितं स्पष्टयत ?

06. अक्षेत्रलक्षणम् उहाहरणपूर्वकं स्पष्टयत ?

07. स्थूलत्वनिरूपणार्थं सूत्रं स्पष्टयत ?

**द्वितीय इकाई**

08. चतुर्भुजानां फलानयनस्य सूत्रं लिखत ?

09. द्वितीयकर्णज्ञानार्थं सूत्रं अर्थसहितं लिखत ?

10.समानलम्बस्याबाधादि ज्ञानाय करणं सूत्रं उत्पत्तिसहितं स्पष्टयत ?

11. भुज–कोटि–कर्णादि ज्ञानाय लघुप्रक्रियां वर्णयत ?

12. कर्णयोर्योगादधो लग्बज्ञानार्थं सूत्रं वृत्तं च वर्णयत ?

13. चतुभुर्जस्य निम्नलिखितोदाहरणस्य साधनं कुरूत–

क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य कर्णौ, ततश्च गणितं गणक! प्रचक्ष।

तुल्यश्रुतेश्च खल तस्य तथाऽऽयतस्य, यद्विस्तृती रसमिताऽष्टमितञ्च दैर्घ्यम्।।

**तृतीय इकाई**

14. वृत्तक्षेत्रज्ञानार्थं करणसूत्रम् स्पष्टयत् ?

15. वृत्तगोलयोः फलानयने करणसूत्रम् उदाहरणसहितं लिखत ?

16. सूक्ष्मवृत्तफलज्ञानार्थं स्थूलफलज्ञानार्थं गोलघनज्ञानार्थं च सूत्रं स्पष्टयत ?

17. चापानयनसूत्रं लेखनपूर्वकम् अर्थस्पष्टं कुरूत ?

18. समत्रिभुजतः समनवभुजक्षेत्राणां भुजज्ञानाय व्यासगुणनार्थं काः नवसंख्याः उक्ताः ?

19. शरानयनं कथं क्रियते इति स्पष्टयत ?

20. जीवानयनं कथं क्रियते सूत्रसहितं स्पष्टयत ?

**चतुर्थ इकाई**

21. खातस्य घनफलानयनसूत्रं लिखत ?

22. खातान्तरे खातघनफल सूचीघनफलायनसूत्रम् उत्पत्तिसहितं लिखत ?

23. चितौ करणसूत्रमुदाहरणसहितं लिखत ?

24. उत्पत्तिसहितं क्रकचव्यवहारार्थं करणसूत्रं लिखत ?

25. राशिव्यवहारस्य एकमुदाहरणं सूत्रसहितं स्पष्टयत ?

26. उदाहरणसहितं छायान्तरकरणसूत्रं वर्णयत ?

27. दीपोच्छ्रित्यानयनाय करणसूत्रमुदाहरणसहितं लिखत ?

**पंचम इकाई**

28. कुट्टकान्तरे 'भवतिकुट्टविधेः...' इत्यादि करणसूत्रमुत्पत्तिसहितं विवेचयत ?

29. कुट्टकान्तर्गतं निम्नलिखितोदाहरणं साधयत –

उदाहरणम् – यद्गुणा गणक षष्टिरन्विता वर्जिता च दशभिः षडुत्तरैः।

स्याद् त्रयोदशहृता निरग्रका तं गुणं कथय मे पृथक्–पृथक्।।

30. कुट्टकान्तरे ' गुणलब्ध्योः समं' इत्यादि करणसूत्रम् उत्पत्तिसहितं विवेचयत ?

31. कुट्टकान्तर्गतं निम्नलिखितोदाहरणं स्पष्टयत –

उदाहरणम् – येन पञ्चगुणिताः खसंयुताः पञ्चषष्टिसहिताश्च तेऽथवा।

स्युस्त्रयोदशहृता निरग्रकास्तं गुणं गुणककीर्तयाशु मे।।

32. गणितापाशान्तर्गतनिर्दिष्टाङ्कैः संख्याविभेदे 'स्थानान्तमेकादिचयाङ्कघातः, ...' इत्यादि सूत्रं पूरयत ?

**33.** अनियताङ्कैस्तुल्यैश्च विभेदे करणसूत्रं उदाहरणसहितं स्पष्टयत ?

**दीर्घोत्तरीयाः प्रश्नाः –**

01. आबाधादीनां साधनपूर्वकं क्षेत्रफलानयनम् उदाहरणपूर्णकं स्पष्टयत ?

02. कोटौ बाहुकर्णयोगे च दृष्टे सूत्रविवेचनपूर्वकम् अहिविलान्तरं उदारणपूर्वकं स्पष्टयत ?

03. समान लम्बस्यावाधादि ज्ञानाय करणसूत्रम् उदाहरणसहितं स्पष्टयत् ?

**उदाहरणम् –**

द्विपञ्चाशन्मितव्येकचत्वारिंशन्मितौ भुजौ ।

मुखं तु पञ्चविंशत्या तुल्यं षष्ट्या मही किल।।

अतुल्यलम्बकं क्षेत्रमिदं पूर्वैरूदाहृतम्।

षट्पञ्चाशत् त्रिषष्टिश्च नियते कणयोर्मिती।

कर्णौ तत्रापरौ ब्रूहि समलम्बं च तच्छ्रुती।।

04. सन्ध्याद्यानयनाय करणसूत्रम् उदाहरणपूर्वकं स्पष्टयत् ?

05. शरजीवानयनसूत्रलेखनपूर्वकं निम्नलिखितोदाहरणं साधयत –

उदाहरणम् –

दशविस्तृतिवृत्तान्तर्यत्र ज्या षष्मिता सखे।

तत्रेषु वद बाणाज्ज्यां ज्याबाणाभ्यां च विस्तृतिम्।।

06. स्थूलजीवाज्ञानार्थं लघुक्रियाकरणसूत्रम् विस्तारपूर्वकमुदाहरणसहितं च स्पष्टयत ?

07. खातस्य घनफलानयनसूत्रम् उदाहरणसहितं विस्तारेण वर्णयत –

उदाहरणम् –

भुजवक्रतया दैर्घ्यं दशेशार्ककरैर्मितम्।

त्रिषु स्थानेषु षट्पञ्चसप्तहस्ताऽत्र विस्तृतिः।।

यस्य खातस्य वेधोऽपि द्विचतुस्त्रिमितः सखे।

तत्र खाते कियन्तः स्युर्घनहस्ताः प्रचक्ष्व मे ।।

08. छायाव्यवहारे 'छाययोः कर्णयोरन्तरे.... इत्यादि करणसूत्रम् उदाहरणसहितं स्पष्टयत –?

उदाहरणम् –

नन्दचन्द्रैर्मितं छायतोरन्तरं कर्णयोरन्तरं विश्वतुल्यं ययोः।

ते प्रभे वक्ति यो युक्तिमान् वेत्त्यसौ व्यक्तमव्यक्तयुक्तं हि मन्येऽखिलम्।।

09. कुट्टके वर्णित 'भाज्यो हारः क्षेपकः ..' इत्यादि सम्पूर्णं सुत्रं विस्तरेण विवेचत ?

10. कुट्टकान्तर करणसूत्रसहितं निम्नलिखितोदाहरणं विस्तारेण वर्णयत –

उदाहरणम् –

शतं हतं येन युतं नवत्या विवर्जितं वा विहृतं त्रिषष्ट्या।

निरग्रकं स्याद्वद मे गुणं तं स्पष्टं पटीयान् यदि कुट्टकेऽसि।।

——————00——————

## 'ब' भाग – मुहुर्तचिन्तामणिः (यात्राप्रकरणतः समाप्तिपर्यन्तम्) । (अंक–50)

अतिलघुत्तरीयप्रश्नाः –

**षष्ठम् इकाई**

1. यात्राप्रश्ने प्रश्नलग्ने यदि जन्मराशिः लन्मलग्नराशिः वा भवति चेत् यात्रायाः किं फलं भवति ? (विजयः / पराजयः)
2. चन्द्रमंगलयुक्ते प्रश्नलग्ने शनिना दृष्टे च यात्रायाः फलं किं भवति ? (विजयः / पराजयः)
3. रविः धनुर्मेषसिंहेषु स्थितो भवति चेत् यात्रा कीदृशी भवति ? (शुभफलदा / अशुभफलदा)
4. कासु तिथिषु यात्रा न कर्तव्या ?
5. सोमवासरे शनिवासरे ज्येष्टानक्षत्रे च कस्यां दिशि न व्रजेत् ?
6. राहुग्रहेण भुक्तत्रयोदशनक्षत्राणि कया संज्ञया ज्ञायन्ते ? (जीवपक्षः / मृतपक्षः)
7. सर्वदिग्द्वारसंज्ञकानि नक्षत्राणि कानि ?

**सप्तम् ईकाई**

8. यदि सूर्यचन्द्रौ उत्तरायणं भवतश्चेत् कयोः दिशयोः यात्रा न करणीया ?
9. शुक्रास्ते यदि बुधः पृष्ठदिक्संस्थो भवेत् तदा राज्ञः विजयः पराजयो वा किमिति लिखत ?
10. पश्चिमदिक्स्वामिः कः ?
11. यात्रायां किं लग्नं शुभं भवति ?
12. कुम्भलग्ने कुम्भनवांशे वा यात्रा शुभफलप्रदा उत् अनिष्टा भवति ?
13. केषु नक्षत्रेषु चन्द्रमा भवति चेत् सम्मुखशुक्रदोषः न भवति ?
14. लग्ने सूर्यः भवति चेत् कस्यां दिशि लालाटगो भवति ?

**अष्टम् ईकाई**

15. आश्विनमासस्य शुक्लपक्षस्य दशमी तिथिः केन नाम्ना ज्ञायते ?
16. यज्ञोपवीत–विवाह–देवप्रतिष्ठादिप्रचलति चेत् मध्ये यात्रारम्भः करणीयः न वा।
17. यदि यात्रायां गमनागमनं तद्दिने एव भवति चेत् यात्रामुहुर्तः विचारणीयः अथवा न विचारणीयः।
18. त्रिनवमी दोषेन किं तात्पर्यमस्ति ?
19. अश्विनीनक्षत्रस्य दोहदं किमुक्तम् ?

20. यात्रारम्भे कतिपदं पदातिरेव दिश्यमानं दिशं प्रति चलनीयम् ?

नवम इकाई

21. वृषसिंहमिथुनमकरराशिजनाः ग्रामस्य कस्मिन् भागे न निवसेयुः ?

22. कति वर्गाः भवन्ति तेषां नामानि लिखत ?

23. केषु वारेषु गृहारम्भः न करणीयः ?

24. वैशाखमासे गृहारम्भस्य किं फलं भवति ?

25. सूर्यः यदि अस्तः नीचराशिस्थो वा भवति चेत् गृहारम्भस्य किं फलम् ?

26. अष्टवर्गेषु प्रत्येकस्य वर्गस्य कति संख्यकः वर्गः शत्रुः भवति ?

27. सूर्यनक्षत्रादारभ्य चत्वारि नक्षत्राणि पर्यन्तं द्वारनिर्माणं क्रियते चेत् तस्य किं फलं भवति ?

दशम ईकाई

28. मुहुर्तचिन्तामणेः रचरिया श्रीरामदैवज्ञस्य पितुः नाम किम् ?

29. केषु मासेषु गृहप्रवेशः शुभदः भवति ?

30. पूर्वाभिमुखे गृहप्रवेशे केषु भावेषु स्थितो वामरविः भवति।

31. रक्तवर्णस्य भूमिः कस्य वर्णस्य भवति ?

32. चैत्रमासे गृहप्रवेशः करणीयः न वा ?

33. केषु वासरेषु गृहप्रवेशः न करणीयः ?

2. लघुत्तरीय प्रश्नाः –

प्रथम इकाई

01. यात्रायाम् अशुभयोगानां वर्णनं कुरूत ?

02. केषु नक्षत्रेषु यात्रा शुभा भवति ? नक्षत्रशुद्धिं स्पष्टय।

03. वारशूलं नक्षत्रशूलं च किमिति स्पष्यत ?

04. अकुलसंज्ञक–नक्षत्र–तिथि–वाराणि कानि इति वर्णयत ?

05. राश्यनुसारं घाततिथीनां वर्णनं कुरूत ?

06. कालपाशयोगं किमिति स्पष्टं कुरूत ?

07. योगिनीवासः कस्यां दिशि अस्ति इति तिथ्यनुसारं स्पष्टयत ?

## द्वितीय इकाई

08. यात्रायाम् अयनशुद्धिविचारं स्पष्टयत ?

09. सम्मुखो शुक्रः अस्ति उत् नास्ति इति ज्ञानं कथं करणीयम् ?

10. दिक्स्वामिनः के इति परिभाषापूर्वकं स्पष्टयत ?

11. कस्मिन् समये कस्यां दिशि यात्रा करणीयः इति स्पष्टय ?

12. यात्रायां ग्रहभावफलं विस्तारपूर्वकं स्पष्टयत ?

13. यात्रायाः कयोः अपि विशिष्ठयोगयोः वर्णनं कुरूत ?

## तृतीय इकाई

14. यात्रायां त्रिनवमी दोषः कः इति स्पष्टयत ?

15. नक्षत्रदोहदानां विवेचनं कुरूत ?

16. दिग्दोहदानि कानि दोहदवस्तूनां नामानि लिखत ?

17. केभ्यः स्थानेभ्यः यात्रायाः आरम्भः करणीयः इति स्पष्टयत ?

18. किं नाम प्रस्थानं परिभाषापूर्वकं स्पष्टयत ?

19. केचन् पंचशुभसूचक शकुनानां विवेचनं कुरूत ?

20. केनच पंच अशुभसूचकापशकुनानां वर्णनं कुरूत ?

## चतुर्थ इकाई

21. ग्रामवासे लाभालाभ विचारं राशिमाध्यमेन काकिणी माध्यनेन कथं क्रियते ?

22. गृहद्वारं कस्यां दिशि शुभप्रदो भवति इति राश्यनुसारं स्पष्टय ?

23. गृहारम्भे ग्रहवशात् के योगाः निषिद्धाः सन्ति तान् स्पष्टयत ?

24. गृहारम्भे पञ्चाङ्गशुद्धिः कथं क्रियते ?

25. शालाध्रुवाङ्कपूर्वकं षोडशगृहाणां नामानि लिखत ?

26. लक्ष्मीयुक्तगृहयोगस्य विवरणपूर्वकं गृहारम्भस्य मासफलं स्पष्टय ?

## पंचम इकाई

27. गृहप्रवेशमुहुर्त्तं वर्णयत ?

28. जीर्णग्रहप्रवेशमुहुर्त्तं वर्णयत ?

29. गृहप्रवेशार्थं कुम्भकचक्रस्य निर्माणं कुरूत ?

30. मुहुर्त्तचिन्तामणिः ग्रन्थकारस्य परिचयं लिखत ?

31. विविधदिक्षु भूमेः प्लवानुसारं फलं वर्णयत ?

32. गृहारम्भे वर्जनीयभूमिशयननक्षत्राणि कानि भवन्ति इति स्पष्टयत ?

**दीर्घोत्तरीयाः प्रश्नाः –**

01. परिघदण्डयोगविचारः सविस्तरं रेखाचित्रसहितं च स्पष्टयत ?

02. उदाहरणपूर्वकं सविस्तरं सर्वांकयोगं वर्णयत ?

03. दिक्स्वामिनः वर्णनपूर्वकं लालाटिकयोगां विस्तरेण विवेचनं कुरूत ?

04. योगयात्रायाः केऽपि पंचयोगानां विवेचनं विस्तारपूर्वकं कुरूत ?

05. शुभसूचकशकुनानाम् अशुभसूचकसकुनानां च विस्तारेण विवेचनं कुरूत ?

06. नक्षत्र–तिथि–वारादि दोहदानां विस्तृतं विवेचनं कुरूत ?

07. सविस्तरं गृहविभागवर्णनपूर्वकं दिगनुसारं चक्रनिर्माणं कुरूत ?

08. सविस्तरं विवेचनपूर्वकं वृषवास्तुचक्रस्य निर्माणं कुरूत ?

09. वास्तुपूजनं गृहप्रवेशविधिं च सविस्तरं वर्णयत ?

10. गृहप्रवेशे लग्नात् वामरविविचारं विस्तेण चक्रनिर्माणसहितं कुरूत ?

डॉ. शिवशंकर तिवारी

(उच्च माध्यमिक शिक्षक)

शासकीय सी.एम.राइज उ.मा. विद्यालय औबेदुल्लागंज

जिला रायसेन (म.प्र.)

29. गृहप्रवेशार्थं कुम्भकचक्रस्य निर्माणं कुरूत ?

30. मुहुर्त्तचिन्तामणिः ग्रन्थकारस्य परिचयं लिखत ?

31. विविधदिक्षु भूमेः प्लवानुसारं फलं वर्णयत ?

32. गृहारम्भे वर्जनीयभूमिशयननक्षत्राणि कानि भवन्ति इति स्पष्टयत ?

**दीर्घोत्तरीयाः प्रश्नाः –**

01. परिघदण्डयोगविचारः सविस्तरं रेखाचित्रसहितं च स्पष्टयत ?

02. उदाहरणपूर्वकं सविस्तरं सर्वांकयोगं वर्णयत ?

03. दिक्स्वामिनः वर्णनपूर्वकं लालाटिकयोगां विस्तरेण विवेचनं कुरूत ?

04. योगयात्रायाः केऽपि पंचयोगानां विवेचनं विस्तारपूर्वकं कुरूत ?

05. शुभसूचकशकुनानाम् अशुभसूचकसकुनानां च विस्तारेण विवेचनं कुरूत ?

06. नक्षत्र–तिथि–वारादि दोहदानां विस्तृतं विवेचनं कुरूत ?

07. सविस्तरं गृहविभागवर्णनपूर्वकं दिगनुसारं चक्रनिर्माणं कुरूत ?

08. सविस्तरं विवेचनपूर्वकं वृषवास्तुचक्रस्य निर्माणं कुरूत ?

09. वास्तुपूजनं गृहप्रवेशविधिं च सविस्तरं वर्णयत ?

10. गृहप्रवेशे लग्नात् वामरविविचारं विस्तेण चक्रनिर्माणसहितं कुरूत ?


डॉ. शिवशंकर तिवारी

(उच्च माध्यमिक शिक्षक)

शासकीय सी.एम.राइज उ.मा. विद्यालय औबेदुल्लागंज

जिला रायसेन (म.प्र.)